# ॥ वाल्मीकि रामायण॥

## ३ अरण्यकाण्ड

## अध्याय ६३

पूर्वजोऽप्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम् ।
सारग्राही महासारं प्रतिजग्राह राघवः ॥ १॥

संनिगृह्य महाबाहुः प्रवृद्धं कोपमात्मनः ।
अवष्टभ्य धनुश्चित्रं रामो लक्ष्मणमब्रवीत् ॥ २॥

किं करिष्यावहे वत्स क्व वा गच्छाव लक्ष्मण ।
केनोपायेन पश्येयं सीताम् इति विचिन्तय ॥ ३॥

तं तथा परितापार्तं लक्ष्मणो राममब्रवीत् ।
इदमेव जनस्थानं त्वमन्वेषितुमर्हसि ॥ ४॥

राक्षसैर्बहुभिः कीर्णं नानाद्रुमलतायुतम् ।
सन्तीह गिरिदुर्गाणि निर्दराः कन्दराणि च ॥ ५॥

गुहाश्च विविधा घोरा नानामृगगणाकुलाः ।
आवासाः किंनराणां च गन्धर्वभवनानि च ॥ ६॥

तानि युक्तो मया सार्धं त्वमन्वेषितुमर्हसि ।
त्वद्विधो बुद्धिसम्पन्ना माहात्मानो नरर्षभ ॥ ७॥

आपत्सु न प्रकम्पन्ते वायुवेगैरिवाचलाः ।
इत्युक्तस्तद्वनं सर्वं विचचार सलक्ष्मणः ॥ ८॥

क्रुद्धो रामः शरं घोरं सन्धाय धनुषि क्षुरम् ।
ततः पर्वतकूटाभं महाभागं द्विजोत्तमम् ॥ ९॥

ददर्श पतितं भूमौ क्षतजार्द्रं जटायुषम् ।
तं दृष्ट्वा गिरिशृङ्गाभं रामो लक्ष्मणमब्रवीत् ।
अनेन सीता वैदेही भक्षिता नात्र संशयः ॥ १०॥

गृध्ररूपमिदं व्यक्तं रक्षो भ्रमति काननम् ।
भक्षयित्वा विशालाक्षीमास्ते सीतां यथासुखम् ।
एनं वधिष्ये दीप्ताग्रैर्घोरैर्बाणैरजिह्मगैः ॥ ११॥

इत्युक्त्वाभ्यपतद्गृध्रं सन्धाय धनुषि क्षुरम् ।
क्रुद्धो रामः समुद्रान्तां चालयन्निव मेदिनीम् ॥ १२॥

तं दीनदीनया वाचा सफेनं रुधिरं वमन् ।
अभ्यभाषत पक्षी तु रामं दशरथात्मजम् ॥ १३॥

यामोषधिमिवायुष्मन्नन्वेषसि महावने ।
सा देवी मम च प्राणा रावणेनोभयं हृतम् ॥ १४॥

त्वया विरहिता देवी लक्ष्मणेन च राघव ।
ह्रियमाणा मया दृष्टा रावणेन बलीयसा ॥ १५॥

सीतामभ्यवपन्नोऽहं रावणश्च रणे मया ।
विध्वंसितरथच्छत्रः पातितो धरणीतले ॥ १६॥

एतदस्य धनुर्भग्नमेतदस्य शरावरम् ।
अयमस्य रणे राम भग्नः साङ्ग्रामिको रथः ॥ १७॥

परिश्रान्तस्य मे पक्षौ छित्त्वा खड्गेन रावणः ।
सीतामादाय वैदेहीमुत्पपात विहायसं ।
रक्षसा निहतं पूर्वं न मां हन्तुं त्वमर्हसि ॥ १८॥

रामस्तस्य तु विज्ञाय सीतासक्तां प्रियां कथाम् ।
गृध्रराजं परिष्वज्य रुरोद सहलक्ष्मणः ॥ १९॥

एकमेकायने दुर्गे निःश्वसन्तं कथं चन ।
समीक्ष्य दुःखितो रामः सौमित्रिमिदमब्रवीत् ॥ २०॥

राज्याद्भ्रंशो वने वासः सीता नष्टा हतो द्विजः ।
ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥ २१॥

सम्पूर्णमपि चेदद्य प्रतरेयं महोदधिम् ।
सोऽपि नूनं ममालक्ष्म्या विशुष्येत्सरितां पतिः ॥ २२॥

नास्त्यभाग्यतरो लोके मत्तोऽस्मिन्सचराचरे ।
येनेयं महती प्राप्ता मया व्यसनवागुरा ॥ २३॥

अयं पितृवयस्यो मे गृध्रराजो जरान्वितः ।
शेते विनिहतो भूमौ मम भाग्यविपर्ययात् ॥ २४॥

इत्येवमुक्त्वा बहुशो राघवः सहलक्ष्मणः ।

जटायुषं च पस्पर्श पितृस्नेहं निदर्शयन् ॥ २५ ॥

निकृत्तपक्षं रुधिरावसिक्तं
तं गृध्रराजं परिरभ्य रामः ।
क्व मैथिलि प्राणसमा ममेति
विमुच्य वाचं निपपात भूमौ ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com